Aug 2012

(1)

# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः - 02-09-2012     अङ्काः-100

पूर्वाह्णे - 10-00 तः 1-00 पर्यन्तम्     समयः-3-00 होराः

**1 एकवाक्येन संस्कृतभाषया लिखत। (अष्टानामेव)** 8×1=8

1. गणेशं के कदा नमस्कुर्वन्ति ?
2. भोजस्य कस्मिन् महानादरः आसीत् ?
3. विक्रमः फलं कस्मै प्रायच्छत् ?
4. शावकौ काभ्यां व्यक्रीणात् ?
5. द्रोणाचार्यस्य प्रसिद्धः शिष्यः कः ?
6. धर्मव्याधः कुत्र न्यवसत् ?
7. मल्लस्य नाम किम् ?
8. शङ्कराचार्यस्य मातापितरौ कौ ?
9. भुजङ्गमः रोषात् किमकरोत् ?
10. केषां मतिः क्षीयते ?

**2 द्वित्रैः वाक्यैः संस्कृतभाषायां उत्तरं लिखत। (पञ्चानामेव)** 5×2=10

1. षट् दोषाः के ?
2. विष्णुशर्मणः प्रतिज्ञा का ?
3. रावणः सीतां किमवदत् ?
4. भूतानां प्रलयोदयौ कौ ?
5. के के त्याज्याः ?
6. शङ्कराचार्यः कदा अवादरत् ?



पश्चादनुवर्तते

**3** **संस्कृतभाषया उत्तरं लिखत । (त्रयाणामेव)** 3×3=9

1. एकलव्यस्य गुरुभक्तिः ।
2. हनूमान् समुद्रस्योपरि किं किं चकार ?
3. चित्रग्रीवः कः ? स स्वाश्रितान् कथं ररक्ष ?
4. गृहिणी द्विजं किं अवदत् ?

**4** **त्रयाणामुत्तरं मातृभाषया आङ्ग्लभाषया वा लिखत ।** 3×4=12

1 'ब्राह्मणः सर्पश्च' अस्य पाठस्य सारांशम् लिखत।
2. 'श्री शङ्करभगवत्पादाः' पाठस्य संक्षिप्तं विवरणं लिखत।
3. 'कालिदासः' कविचक्रवर्ती कथं अभवत् ?
4. पञ्चतन्त्र-कथामुखम्।

**5** **ससन्दर्भं विवृणुत । (चतुर्णामेव )** 4×3=12

1. वशमेष्यन्ति मे तदा ।
2. तदेनं हत्वा सर्वमेकवारं ग्रहीष्यामि ।
3. तदनन्तरं यद्भावि तद्भवतु ।
4. भवति, भिक्षां देहि ।
5. अतिथिसत्कारः श्रेयस्करः ।

**6** **मातृभाषया अन्वयानुसारम् अर्थं लिखत । (द्वयोरेव)** 2×3=6

1. जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
   नास्ति येषां यशः काये जरामरणजं भयम् ।।
2. गते तु रावणे सीतां प्रलपन्तीं स मारुतिः।
   उक्त्वा रामस्य वृत्तान्तं प्रददौ चाङ्गुलीयकम्।।
3. त्वं पितृणामपि पिता देवानामपि देवता।
   परतोऽपि परश्चासि विधाता वेधसामपि।।

Aug 2012
(3)

**7** **श्लोकद्वयं पूरयत । (द्वयोरेव)** 2×3=6

1. शान्ताकारं ....................................... लोकैकनाथम् ।।
2. प्रत्यहं ........................................... सत्पुरुषैरिति।।
3. रविनिशाकरयोः ........................................ मे मतिः।।

**8** **मातृभाषया अनुवादं कुरुत ।** 5

अथ स राजा तस्य प्रतिज्ञाया प्रहृष्टः सादरं स्वकुमारान्तस्मै समर्प्य परां निर्वृतिमाजगाम। विष्णुशर्मणापि तेषां कृते मित्रभेद-मित्रप्राप्ति-काकोलूकीय-लब्धप्रणाशऽ परीक्षितकारकाणि चेति पञ्च तन्त्राणि रचयित्वा पाठितास्ते राजपुत्राः। तेऽपि तान्यधीत्य मासषट्केन नीतिशास्त्रकोविदाः संवृत्ताः।

**9** **रिक्तस्थानानि पूरयत ।** 4×1=4

1. कालिदासः स्वप्रतिभया सर्वान्यान् .................. अत्यशेत। ।
2. निरालम्बो वाग्डम्बरो न ..................... ।
3. .................. पथः प्रविचलन्ति पदं न धीराः ।
4. सर्पेण ..................... कृतम् ।

**10** **त्रयाणां पर्यायपदानि लिखत ।** 3×1=3

1. सन्नद्धः 2. सद्म 3. भूसुरः 4. तन्द्रा

**11** **त्रयाणां विरुद्धार्थकपदानि लिखत ।** 3×1=3

1. भद्रम् 2. हितः 3. सूक्ष्मः 4. दिवा

**12** **वाक्यदोषं परिहरत ।** 3×1=3

1. भवान् गच्छ 2. अहम् भद्रमिदं न पश्यति।
3. युवाम् शालाम् गच्छ।

**13** **त्रयाणाम् वाक्यानि रचयत ।** 3×1=3

1. शाश्वतः 2. अकरोत् 3. अन्तिकम् 4. सारमेयः



पश्चादनुवर्तते

**14 क्रियापदमेकं सर्वपुरुषवचनेषु लिखत ।** 3

1. कारयामास 2. निन्दतु 3. अभूत्

**15 त्रयाणां सन्धिं विभज्य नाम लिखत ।** 3

1. यन्ममैते 2. तेनेदं 3. अतस्तस्य

**16 द्वयोः प्रयोगपरिवर्तनं कुरुत ।** 3

1. मत्पुत्रः स्वकर्मणः फलं अनुभूतवान् ।
2. एकोऽमात्यः प्रोवाच ।
3. तेन पूजा न कृता ।

**17 सुबन्तं तिङन्तं अव्ययं च पृथक् कुरुत ।** 3

1. उपसृत्य 2. अहम् 3. गच्छन्
4. प्राह 5. अकरोत् 6. तस्मात्

**18 अर्थविवरणेन सह लोकोक्तिमेकां पूरयत ।** 2×1=2

1. उद्योगिनं ............................................ ।
2. चक्रारपंक्तिरिव ...................................... ।

**19 व्याकरण विशेषं लिखत । (एकस्य)** 2×1=2

1. आस्ते स्म।
2. कपोतराजः।

* * * * *

Aug 2012
(5)

# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

### द्वितीयपत्रिका

दिनाङ्कः – 02-09-2012 अङ्काः–50
अपराह्ने - 1-30 तः 3-00 पर्यन्तम् समयः–सार्धैकहोरा

**1 दशवाक्यैः संस्कृतेन प्रबन्धम् आरचयत । (एकमधिकृत्य)** 1x5=5

1. उद्यानम् 2. पुस्तकभण्डारः 3. धेनुः

**2 संस्कृतेन पत्रमेकं लिखत ।** 1x5=5

1. मित्राय पत्रं – प्रवासविषये ।
2. उद्योगार्थम् अभ्यर्थनापत्रम् ।

**3 द्वयोः लक्षणं विवरणं च स्वेष्टभाषया लिखत ।** 2x3=6

1. तुमुन् प्रत्ययः 2. अव्ययानि 3. विशेषणम्

**4 त्रिषु पुरुष वचनेषु लिखत । (द्वावेव)** 2x3=6

1. गच्छेत् 2. अगच्छत् 3. गमिष्यति

**5 एकस्य सुबन्तस्य सकलविभक्तिरूपाणि सर्वेषु वचनेषु लिखत ।** 1x3=3

1. युष्मद् 2. राजन् 3. फलम्

**6 वाक्यदोषान् परिहरत ।** 1x4=4

1. प्रजाभिः स्वस्ति । 2. रामलक्ष्मणौ वनं अगच्छत् ।
3. गुरोः अभितः छात्राः उपविशन्ति । 4. वृक्षेण पत्रं पतति ।

**7 प्रयोगपरिवर्तनं कुरुत ।** 1x4=4

1. त्वं गृहं गच्छ । 2. पुत्रेण पिता अनम्यत ।
3. सीतया नर्त्यते । 4. अहं तं अपश्यम् ।

**8 त्रयाणां अन्यलिङ्गरूपं लिखत ।** 1x4=4

1. व्याघ्रः 2. माता 3. नदी 4. श्वशुरः



पश्चादनुवर्तते

Aug 2012
(6)

**9 वाक्यमेकं स्वोत्तरभाषया विवृणुत ।** 1×3=3

1. नास्ति मातृसमो बन्धुः ।
2. विनाश काले विपरीत बुद्धिः ।

**10 मातृभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** 5

1. वायुना वृक्षाः कम्पन्ते ।
2. यूयं संस्कृतभाषायां लेखितुं प्रयतध्वम् ।
3. हरिः लेखनीम् अयच्छत् ।
4. अहम् पित्रा समं ग्रामं गच्छामि ।
5. धनी दरिद्रेभ्यः धनं यच्छेत् ।

**11 संस्कृते अनुवदत ।** 5

1. ನಾನು ಬಾಳೆಹಣ್ಣನ್ನು ತಿನ್ನುತ್ತೇನೆ.
   I eat Banana.
2. ಗೋಪಿಕೆಯರು ಕೃಷ್ಣನ ಸುತ್ತಲೂ ಕುಣಿಯುತ್ತಾರೆ.
   Gopikas dance around Krishna.
3. ಗೌರಿಯು ಹಾಲನ್ನು ಕುಡಿದಳು.
   Gowri drank milk.
4. ನಾನು ಸಂಸ್ಕೃತದಲ್ಲಿ 60 ಅಂಕಗಳನ್ನು ಪಡೆದೆನು.
   I got 60 marks in Sanskrit.
5. ಹಕ್ಕಿಗಳು ಆಕಾಶದಲ್ಲಿ ವೇಗವಾಗಿ ಹಾರುತ್ತವೆ.
   Birds can flew fast in the sky.

* * * * *